# Premamritarasayanastotram

# પ્રેમામૃતરસાયનસ્તોત્રમ્

## Document Information

Text title : premAmRitarasAyanastotram

File name : premAmRRitarasAyanastotram.itx

Category : vishhnu, krishna, vishnu, vallabhaachaarya, puShTimArgIya

Location : doc_vishhnu

Author : Chaitanyamahaprabhu, vallabhAchArya attribution

Transliterated by : Malika Das March 18, 2004

Proofread by : Malika Das, Shankara shankara_2000 at yahoo.com

Acknowledge-Permission: Premamrta-rasayanam, Jagat at http://granthamandira.net

Latest update : January 28, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# પ્રેમામૃતરસાયનસ્તોત્રમ્

પ્રેમાવતારશ્રીમન્મહાપ્રભુકૃષ્ણચૈતન્યદેવ
મુખપદ્મવિનિર્ગતમ્

એકદા કૃષ્ણવિરહાદ્ધ્યાયન્તી પ્રિયસઙ્ગમમ્ ।
મનોબાષ્પનિરાસાય જલ્પતીદં મુહુર્મુહુઃ ॥ ૧॥

કૃષ્ણઃ કૃષ્ણેન્દુરાનન્દો ગોવિન્દો ગોકુલોત્સવઃ ।
ગોપાલો ગોપગોપીશો વલ્લવેન્દ્રો વ્રજેશ્વરઃ ॥ ૨॥

પ્રત્યહં નૂતનતરસ્તરુણાનન્દવિગ્રહઃ ।
આનન્દૈકસુખસ્વામી સન્તોષાક્ષયકોષભૂઃ ॥ ૩॥

આભીરાભિનવાનન્દઃ પરમાનન્દકન્દલઃ ।
વૃન્દાવનકલાનાથો વ્રજાનઙ્ગનવાઙ્કુરઃ ॥ ૪॥ વ્રજાનન્દ

નયનાનન્દકુસુમો વ્રજભાગ્યફલોદયઃ ।
પ્રતિક્ષણાતિસુખદો મોહનો મધુરદ્યુતિઃ ॥ ૫॥

સુધાનિર્યાસનિચયઃ સુન્દરઃ શીતલાકૃતિઃ । શ્યામલાકૃતિઃ
નવયૌવનસમ્ભિન્નશ્યામામૃતરસાર્ણવઃ ॥ ૬॥

ઇન્દ્રનીલમણિસ્વચ્છો દલિતાઞ્જનચિક્કણઃ ।
ઇન્દીવરસુખસ્પર્શો નીરદસ્નિગ્ધસુન્દરઃ ॥ ૭॥

કર્પૂરાગરુકસ્તૂરીકુઙ્કુમાક્તાઙ્ગધૂસરઃ ।
સુકુઞ્ચિતકચગ્રસ્તોલ્લસચ્ચારુશિખણ્ડકઃ ॥ ૮॥

મત્તાલિવિભ્રમત્પારિજાતપુષ્પાવતંસકઃ । મત્તાલિવિલસત્
આનનેન્દુજિતાનન્તપૂર્ણશારદચન્દ્રમાઃ ॥ ૯॥

શ્રીમલ્લલાટપાટીરતિલકાલકરઞ્જિતઃ ।
લીલોન્નતભ્રૂવિલાસો મદાલસવિલોચનઃ ॥ ૧૦॥

આકર્ણારક્તસૌન્દર્યલહરીદૃષ્ટિમન્થરઃ ।
ઘૂર્ણાયમાનનયનઃ સાચીક્ષણવિચક્ષણઃ ॥ ૧૧॥

અપાઙ્ગેઙ્ગિતસૌભાગ્યતરલીકૃતચેતનઃ ।
ઈષન્મુદ્રિતલોલાક્ષઃ સુનાસાપુટસુન્દરઃ ॥ ૧૨॥

ગણ્ડપ્રાન્તોલ્લસત્કર્ણમકરાકૃતિકુણ્ડલઃ ।
પ્રસન્નાનન્દવદનો જગદાહ્લાદકાનનઃ ॥ ૧૩॥ જગદાહ્લાદકારકઃ

સુસ્મેરાધૃતલાવણ્યપ્રકાશીકૃતદિઙ્મુખઃ । ધૃતસૌન્દર્ય
સિન્દૂરારુણસુસ્નિગ્ધમાણિક્યદશનચ્છદઃ ॥ ૧૪॥

પીયૂષાધિકમાધ્વીકસૂક્તઃ શ્રુતિરસાયનઃ । સૂક્તિ
ત્રિભઙ્ગલલિતસ્તિર્યગ્ગ્રીવસ્ત્રૈલોક્યમોહનઃ ॥ ૧૫॥

કુઞ્ચિતાધરસંસિક્તકૂજદ્વેણુવિનોદવાન્ । સાસક્તકૂજ
કઙ્કણાઙ્ગદકેયૂરમુદ્રિકાદિલસદ્ભુજઃ ॥ ૧૬॥ મુદ્રિકાવિલસદ્

સ્વર્ણસૂત્રસુવિન્યસ્તકૌસ્તુભામુક્તકન્ધરઃ ।
મુક્તાહારોલ્લસદ્વક્ષઃ સ્ફુરચ્છ્રીવત્સલાઞ્છનઃ ॥ ૧૭॥

આપીનહૃદયો નીપમાલ્યવાન્ બન્ધુરોદરઃ ।
સંવીતપીતવસનો રશનાવિલસત્કટિઃ ॥ ૧૮॥

અન્તરીયઘટીબન્ધપ્રપદાન્દોલિતાઞ્ચલઃ ।
અરવિન્દપદદ્વન્દ્વકલક્વણિતનૂપુરઃ ॥ ૧૯॥ ક્વણત્કારિતનૂપુરઃ

બન્ધૂકારુણમાધુર્યસુકુમારપદામ્બુજઃ । પલ્લવારુણ
નખચન્દ્રજિતાશેષદર્પણેન્દુમણિપ્રભઃ ॥ ૨૦॥

ધ્વજવજ્રાઙ્કુશામ્ભોજરાજચ્ચરણપલ્લવઃ ।
ત્રૈલોક્યાદ્ભુતસૌન્દર્યપરિપાકમનોહરઃ ॥ ૨૧॥

સાક્ષાત્કેલિકલામૂર્તિઃ પરિહાસરસાર્ણવઃ ।
યમુનોપવનશ્રેણીવિહારી વ્રજનાગરઃ ॥ ૨૨॥ શ્રેણીવિલાસે

ગોપાઙ્ગનાજનાસક્તો વૃન્દારણ્યપુરન્દરઃ ।
આભીરનાગરીપ્રાણનાયકઃ કામશેખરઃ ॥ ૨૩॥

યમુનાનાવિકો ગોપીપારાવારકૃતોદ્યમઃ ।
રાધાવરુન્ધનરતઃ કદમ્બવનમન્દિરઃ ॥ ૨૪॥ રાધાવરોધન

વ્રજયોષિત્સદાહૃદ્યો ગોપીલોચનતારકઃ ।
જીવનાનન્દરસિકઃ પૂર્ણાનન્દકુતૂહલઃ ॥ ૨૫॥ યમુનાનન્દ

ગોપિકાકુચકસ્તૂરીપઙ્કિલઃ કેલિલાલસઃ ।
અલક્ષિતકુટીરસ્થો રાધાસર્વસ્વસમ્પુટઃ ॥ ૨૬॥

વલ્લવીવદનામ્ભોજમધુમત્તમધુવ્રતઃ ।
નિગૂઢરસવિદ્ગોપીચિત્તાહ્લાદકકાનનઃ ॥ ૨૭॥ ચિત્તાહ્લાદકલાનિધિઃ

કાલિન્દીપુલિનાનન્દી ક્રીડાતાણ્ડવપણ્ડિતઃ ।
આભીરિકાનવાનઙ્ગરઙ્ગભૂમિસુધાકરઃ ॥ ૨૮॥ જનાનઙ્ગ

વિદગ્ધગોપવનિતાચિત્તાકૂતવિનોદકૃત્ ।
નાનોપાયનપાણિસ્થગોપનારીગણાવૃતઃ ॥ ૨૯॥

વાઞ્છાકલ્પતરુઃ કામકલારસશિરોમણિઃ ।
કન્દર્પકોટિલાવણ્યઃ કોટીન્દુલલિતદ્યુતિઃ ॥ ૩૦॥

જગત્ત્રયમનોમોહકરો મન્મથમન્મથઃ ।
ગોપસીમન્તિનીશશ્વદ્ભાવાપેક્ષાપરાયણઃ ॥ ૩૧॥

નવીનમધુરસ્નેહઃ પ્રેયસીપ્રેમસઞ્ચયઃ ।
ગોપીમનોરથાક્રાન્તો નાટ્યલીલાવિશારદઃ ॥ ૩૨॥

પ્રત્યઙ્ગરભસાવેશપ્રમદાપ્રાણવલ્લભઃ ।
રાસોલ્લાસમદોન્મત્તો રાધિકારતિલમ્પટઃ ॥ ૩૩॥

ખેલાલીલાપરિશ્રાન્તઃ સ્વેદાઙ્કુરચિતાનનઃ । હેલાલીલા
ગોપિકાઙ્કાલસઃ શ્રીમાન્ મલયાનિલસેવિતઃ ॥ ૩૪॥

(સકૃત્પ્રપન્નજનતાસંરક્ષણધુરન્ધરઃ ।
સુપ્રસન્ને વાસુદેવો ગોપિકાજનવલ્લભઃ ॥)
ઇત્યેવં પ્રાણનાથસ્ય પ્રેમામૃતરસાયનમ્ ।
યઃ પઠેચ્છ્રાવયેદ્ વાપિ સ પ્રેમ્ણિ પ્રમિલેદ્ ધ્રુવમ્ ॥ ૩૫॥

ઇતિ શ્રીવલ્લભાચાર્યવિરચિતં કૃષ્ણપ્રેમામૃતરસાયનસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Malika Das

Proofread by Malika Das, Shankara, NA

There are variations from Vishnustutimanjari 1
Also, some attribute this to chaitanyamahApravhu as well.

---

*Premamritarasayanastotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*